# Navagrahasukta

# નવગ્રહસૂક્તમ્

## Document Information

Text title : Navagraha Suktam

File name : navagraha.itx

Category : sUkta, navagraha, svara, nava, nava

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Latest update : December 7, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2022

*sanskritdocuments.org*

# નવગ્રહસૂક્તમ્

॥ ગણેશવન્દના ॥

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વ વિઘ્નોપશાન્તયે ॥

॥ પ્રાણાયામમ્ ॥

ૐ ભૂઃ । ૐ ભુવઃ । ઓ૱ સુવઃ ।
ૐ મહઃ । ૐ જનઃ । ૐ તપઃ । ઓ૱ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ ।
ઓમાપો જ્યોતીરસોઽમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ્ ॥

॥ સઙ્કલ્પઃ ॥

મમોપાત્ત-સમસ્ત-દુરિતક્ષયદ્વારા શ્રીપરમેશ્વર પ્રીત્યર્થં
આદિત્યાદિ નવગ્રહ દેવતા પ્રસાદ સિદ્ધ્યર્તં આદિત્યાદિ
નવગ્રહ નમસ્કારાન્ કરિષ્યે ॥

॥ મન્ત્રાણિ ॥

ૐ આસત્યેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યં ચ ।
હિરણ્યયેન સવિતા રથેનાऽऽદેવો યાતિ ભુવના વિપશ્યન્ ।
અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।
અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥
યેષામીશે પશુપતિઃ પશૂનાં ચતુષ્પદામુત ચ દ્વિપદામ્ ।
નિષ્ક્રીતોઽયં યજ્ઞિયં ભાગમેતુ રાયસ્પોષા યજમાનસ્ય સન્તુ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય આદિત્યાય નમઃ ॥ ૧॥

ૐ આપ્યાયસ્વ  સમેતુ તે વિશ્વતસ્સોમ  વૃષ્ણિયમ્ ।
ભવા  વાજસ્ય સઙ્ગથે ॥

અપ્સુમે  સોમો  અબ્રવીદન્તર્વિશ્વાનિ ભેષજા ।
અગ્નિઞ્ચ  વિશ્વશમ્ભુવમાપશ્ચ વિશ્વભેષજીઃ ।
ગૌરી મિમાય સલિલાનિ  તક્ષત્યેકપદી દ્વિપદી  સા ચતુષ્પદી ।
અષ્ટાપદી  નવપદી બભૂવુષી  સહસ્રાક્ષરા પરમે વ્યોમન્ ।
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય સોમાય  નમઃ  ॥ ૨॥

ૐ અગ્નિર્મૂર્દ્ધા દિવઃ કકુત્પતિઃ  પૃથિવ્યા અયમ્ ।
અપાꣳ રેતાꣳસિ જિન્વતિ ।
સ્યોના પૃથિવિ  ભવાઽનૃક્ષરા નિવેશનિ । યચ્છાનશ્શર્મ  સપ્રથાઃ  ।
ક્ષેત્રસ્ય  પતિના વયꣳ હિતે નેવ જયામસિ ।
ગામશ્વં  પોષયિન્ત્વા સ નો  મૃડાતીદૃશે  ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય અઙ્ગારકાય  નમઃ  ॥ ૩॥

ૐ ઉદ્બુધ્યસ્વાગ્ને  પ્રતિજાગૃહ્યેનમિષ્ટાપૂર્તે સꣳ સૃજેથામયઞ્ચ ।
પુનઃ  કૃણ્વꣳસ્ત્વા  પિતરં  યુવાનમન્વાતાꣳસીત્વયિ  તન્તુમેતમ્ ॥

ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂઢમસ્યપાꣳ સુરે ॥
વિષ્ણો  રરાટમસિ  વિષ્ણોઃ  પૃષ્ઠમસિ  વિષ્ણોશ્શ્નપ્ત્રેસ્થો
વિષ્ણોસ્સ્યૂરસિ  વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ  વિષ્ણવે ત્વા ।
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બુધાય  નમઃ  ॥ ૪॥

ૐ બૃહસ્પતે  અતિયદર્યો અર્હાદ્દ્યુમદ્વિભાતિ  ક્રતુમજ્જનેષુ ।
યદ્દિદયચ્છવસર્તપ્રજાત  તદસ્માસુ  દ્રવિણન્ધેહિ ચિત્રમ્ ॥

ઇન્દ્રમરુત્વ ઇહ પાહિ  સોમં  યથા  શાર્યાતે અપિબસ્સુતસ્ય ।
તવ  પ્રણીતી  તવ  શૂરશર્મન્નાવિવાસન્તિ કવયસુયજ્ઞાઃ ॥

બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતસ્સુરુચો  વેન આવઃ ।
સબુધ્નિયા  ઉપમા અસ્ય વિષ્ઠાસ્સતશ્ચ  યોનિમસતશ્ચ  વિવઃ
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બૃહસ્પતયે  નમઃ  ॥ ૫॥

ૐ પ્રવશ્શુક્રાય ભાનવે ભરધ્વમ્ । હવ્યં મતિં ચાગ્નયે સુપૂતમ્ ॥
યો દૈવ્યાનિ માનુષા જનૂꣳષિ। અન્તર્વિશ્વાનિ વિદ્મ ના જિગાતિ ॥

ઇન્દ્રાણીમાસુ નારિષુ સુપત્નીમહમશ્રવમ્ ।
ન હ્યસ્યા અપરઞ્ચન જરસા મરતે પતિઃ ॥
ઇન્દ્રં વો વિશ્વતસ્પરિ હવામહે જનેભ્યઃ । અસ્માકમસ્તુ કેવલઃ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શુક્રાય નમઃ ॥ ૬॥

ૐ શન્નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે। શંયોરભિસ્રવન્તુ નઃ ॥
પ્રજાપતે ન ત્વદેતાન્યન્યો વિશ્વા જાતાનિ પરિતા બભૂવ ।
યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ વયꣳ સ્યામ પતયો રયીણામ્ ।
ઇમં યમપ્રસ્તરમાહિ સીદાઽઙ્ગિરોભિઃ પિતૃભિસ્સંવિદાનઃ ।
આત્વા મન્ત્રાઃ કવિશસ્તા વહન્ત્વેના રાજન્ હવિષા માદયસ્વ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શનૈશ્ચરાય નમઃ ॥ ૭॥

ૐ કયા નશ્ચિત્ર આભુવદૂતી સદાવૃધસ્સખા।
કયા શચિષ્ઠયા વૃતા ।
આઽયઙ્ગૌઃ પૃશ્નિરક્રમીદસનન્માતરં પુનઃ । પિતરઞ્ચ પ્રયન્ત્સુવઃ ।
યત્તે દેવી નિરૃતિરાબબન્ધ દામ ગ્રીવાસ્વવિચર્ત્યમ્ ।
ઇદન્તે તદ્વિષ્યામ્યાયુષો ન મધ્યાદથાજીવઃ પિતુમદ્ધિ પ્રમુક્તઃ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય રાહવે નમઃ ॥ ૮॥

ૐ કેતુઙ્કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે। સમુષદ્ભિરજાયથાઃ ॥
બ્રહ્મા દેવાનાં પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનોગૃધ્રાણાꣳ સ્વધિતિર્વનાનાꣳ સોમઃ પવિત્રમત્યેતિ રેભન્।
સચિત્ર ચિત્રં ચિતયન્તમસ્મે ચિત્રક્ષત્ર ચિત્રતમં વયોધામ્ ।
ચન્દ્રં રયિં પુરુવીરમ્ બૃહન્તં ચન્દ્રચન્દ્રાભિર્ગૃણતે યુવસ્વ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતેભ્યઃ કેતુભ્યો નમઃ ॥ ૯॥

॥ ૐ આદિત્યાદિ નવગ્રહ દેવતાભ્યો નમો નમઃ ॥

॥ ૐ શાન્તિઃ॒ શાન્તિઃ॒ શાન્તિઃ॑ ॥

## નવગ્રહસૂક્તમ્ સ્વરરહિતમ્

॥ ગણેશવન્દના ॥

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વ વિઘ્નોપશાન્તયે ॥

॥ પ્રાણાયામમ્ ॥

ૐ ભૂઃ । ૐ ભુવઃ । ઓꣳ સુવઃ ।
ૐ મહઃ । ૐ જનઃ । ૐ તપઃ । ઓꣳ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહિ ।
ધિયો યો નઃ પ્રચોદયાત્ ।
ઓમાપો જ્યોતીરસોઽમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ્ ॥

॥ સઙ્કલ્પઃ ॥

મમોપાત્ત-સમસ્ત-દુરિતક્ષયદ્વારા શ્રીપરમેશ્વર પ્રીત્યર્થં
આદિત્યાદિ નવગ્રહ દેવતા પ્રસાદ સિદ્ધ્યર્તં આદિત્યાદિ
નવગ્રહ નમસ્કારાન્ કરિષ્યે ॥

॥ મન્ત્રાણિ ॥

ૐ આસત્યેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યં ચ ।
હિરણ્યયેન સવિતા રથેનાઽઽદેવો યાતિ ભુવના વિપશ્યન્।
અગ્નિં દૂતં વૃણીમહે હોતારં વિશ્વવેદસમ્ ।
અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥

યેષામીશે પશુપતિઃ પશૂનાં ચતુષ્પદામુત ચ દ્વિપદામ્ ।
નિષ્ક્રીતોઽયં યજ્ઞિયં ભાગમેતુ રાયસ્પોષા યજમાનસ્ય સન્તુ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય આદિત્યાય નમઃ ॥ ૧॥

ૐ આપ્યાયસ્વ સમેતુ તે વિશ્વતસ્સોમ વૃષ્ણિયમ્ ।
ભવા વાજસ્ય સઙ્ગથે ॥

અપ્સુમે સોમો અબ્રવીદન્તર્વિશ્વાનિ ભેષજા ।

અગ્નિગ્ચ વિશ્વશમ્ભુવમાપશ્ચ વિશ્વભેષજીઃ ।
ગૌરી મિમાય સલિલાનિ તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી સહસ્રાક્ષરા પરમે વ્યોમન્ ।
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય સોમાય નમઃ ॥ ૨॥

ૐ અગ્નિર્મૂર્દ્ધા દિવઃ કકુત્પતિઃ પૃથિવ્યા અયમ્ ।
અપાꣳ રેતાꣳ સિ જિન્વતિ ।
સ્યોના પૃથિવિ ભવાઽનૃક્ષરા નિવેશનિ । યચ્છાનશ્શર્મ સપ્રથાઃ ।
ક્ષેત્રસ્ય પતિના વયꣳ હિતે નેવ જયામસિ ।
ગામશ્વં પોષયિન્ત્વા સ નો મૃડાતીદૃશે ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય અઙ્ગારકાય નમઃ ॥ ૩॥

ૐ ઉદ્બુધ્યસ્વાગ્ને પ્રતિજાગૃહ્યેનમિષ્ટાપૂર્તે સꣳ સૃજેથામયઞ્ચ।
પુનઃ કૃણ્વꣳ સ્ત્વા પિતરં યુવાનમન્વતાઆꣳ સીત્વયિ તન્તુમેતમ્ ॥

ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂઢમસ્યપાꣳ સુરે ॥

વિષ્ણો રરાટમસિ વિષ્ણોઃ પૃષ્ઠમસિ વિષ્ણોશ્શ્નપ્ત્રેસ્થો
વિષ્ણોસ્સ્યૂરસિ વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ વિષ્ણવે ત્વા ।
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બુધાય નમઃ ॥ ૪॥

ૐ બૃહસ્પતે અતિયદર્યો અર્હાદ્દ્યુમદ્વિભાતિ ક્રતુમજ્જનેષુ ।
યદ્દિદયચ્છવસર્તપ્રજાત તદસ્માસુ દ્રવિણન્ધેહિ ચિત્રમ્ ॥

ઇન્દ્રમરુત્વ ઇહ પાહિ સોમં યથા શાર્યાતે અપિબસ્સુતસ્ય।
તવ પ્રણીતી તવ શૂરશર્મન્નાવિવાસન્તિ કવયસુયજ્ઞાઃ ॥

બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતસ્સુરુચો વેન આવઃ ।
સબુધ્નિયા ઉપમા અસ્ય વિષ્ઠાસ્સતશ્ચ યોનિમસતશ્ચ વિવઃ
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બૃહસ્પતયે નમઃ ॥ ૫॥

ૐ પ્રવશ્શુક્રાય ભાનવે ભરધ્વમ્ । હવ્યં મતિં ચાગ્નયે સુપૂતમ્ ॥

યો દૈવ્યાનિ માનુષા જનૂꣳ ષિ । અન્તર્વિશ્વાનિ વિદ્મ ના જિગાતિ ॥

ઇન્દ્રાણીમાસુ નારિષુ સુપત્નીમહમશ્રવમ્ ।
ન હ્યસ્યા અપરઞ્ચન જરસા મરતે પતિઃ ॥

ઇન્દ્રં વો વિશ્વતસ્પરિ હવામહે જનેભ્યઃ । અસ્માકમસ્તુ કેવલઃ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શુક્રાય નમઃ ॥ ૬॥

ૐ શન્નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે । શંયોરભિસ્રવન્તુ નઃ ॥

પ્રજાપતે ન ત્વદેતાન્યન્યો વિશ્વા જાતાનિ પરિતા બભૂવ ।
યત્કામાસ્તે જુહુમસ્તન્નો અસ્તુ વયꣳ સ્યામ પતયો રયીણામ્ ।
ઇમં યમપ્રસ્તરમાહિ સીદાઽઙ્ગિરોભિઃ પિતૃભિસ્સંવિદાનઃ ।
આત્વા મન્ત્રાઃ કવિશસ્તા વહન્ત્વેના રાજન્ હવિષા માદયસ્વ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શનૈશ્ચરાય નમઃ ॥ ૭॥

ૐ કયા નશ્ચિત્ર આભુવદૂતી સદાવૃધસ્સખા।
કયા શચિષ્ઠયા વૃતા ।
આઽયઙ્ગૌઃ પૃશ્નિરક્રમીદસનન્માતરં પુનઃ । પિતરઞ્ચ પ્રયન્ત્સુવઃ ।
યત્તે દેવી નિરૃતિરાબબન્ધ દામ ગ્રીવાસ્વવિચર્ત્યમ્ ।
ઇદન્તે તદ્વિષ્યામ્યાયુષો ન મધ્યાદથાજીવઃ પિતુમદ્ધિ પ્રમુક્તઃ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય રાહવે નમઃ ॥ ૮॥

ૐ કેતુઙ્કૃણ્વન્નકેતવે પેશો મર્યા અપેશસે । સમુષદ્ભિરજાયથાઃ ॥

બ્રહ્મા દેવાનાં પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।
શ્યેનોગૃધ્રાણાꣳ સ્વધિતિર્વનાનાꣳ સોમઃ પવિત્રમત્યેતિ રેભન્।
સચિત્ર ચિત્રં ચિતયન્તમસ્મે ચિત્રક્ષત્ર ચિત્રતમં વયોધામ્ ।
ચન્દ્રં રયિં પુરુવીરમ્ બૃહન્તં ચન્દ્રચન્દ્રાભિર્ગૃણતે યુવસ્વ ॥

ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતેભ્યઃ કેતુભ્યો નમઃ ॥ ૯॥

॥ ૐ આદિત્યાદિ નવગ્રહ દેવતાભ્યો નમો નમઃ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded with Accents and proofread by Rajagopal Iyer rajsand@yahoo.com

*Navagrahasukta*

pdf was typeset on December 7, 2022

Please send corrections to *sanskrit@cheerful.com*